No. ४६३७

Title विनायकशान्तिः शाङ्खायन

Author * शाखाभिप्राया

Extent १२ पत्राणि Age सं. २७६०

Subject धर्मशास्त्रम्

विनायकशान्तिः

५६२७

विनायकशांतिः

प सं०

पद्धतिः

मु। = अनन्त देव

॥१॥ ॥श्रीगणेशाय नमः॥ शांखायनशाखान्विप्रायेण विनायकशांतिर्लिख्यते॥ पूर्वदिने मंडपकुंडादिक-
रणीयं॥ होमप्रमाणेन कुंडमानमिति शौनकः॥ शाते शतार्द्धके होमे मुष्टिरत्निप्रमाणतः। सहस्रा-
युत होमे तु हस्तं हस्तद्वयं मतं॥ होमकुंडादुत्तरभागे तद्रपीठं॥ तद्यथा॥ पुण्याहे स्थिरनक्षत्रे स्थं-
डिले त्रिंशदंगुले॥ चतुः कुंभांस्ततः स्थाप्य सहिरण्यान्सपल्लवान्॥ तत्पूर्वभागे ग्रहपीठं वासि-
ष्ठीभाष्ये॥ कुंडस्य रुद्रदिग्भागे ईशानदिशायां द्विहस्तं ग्रहाणां सूर्यादीनां स्थापनमा[illegible]ये मातृपीठं च-
तुरस्रं समं किंचिन्मध्ये न्मानं द्विहस्तं कारयेत्॥ कुंडाभावे होमार्थं पीठमानमेव। पंचप्रादेशा ह-
स्तत्वेव पुरेषु नवतीतिश्रुतेः॥ होमार्थं स्थंडिले पीठं कार्यमिति शौनकः॥ तत्रमेखलायोनिनावः
बुधस्त्वागंव सोममंडलमानतो ज्ञेयं तन्मानमिहास्माभिर्न लिखितं॥ शौनकः॥ द्वादशाद्विगुणे
चैव त्रिचतुष्कनवद्वयं। सूर्यादीनां क्रमात्तं च विंशत्यष्टार्द्धमंगुलं। त्रिंशांगुलं तु कर्तव्यमंतरं
ग्रहपीठयोः कुंडस्येशानदिग्भागे द्विहस्तं पीठमाचरेत्॥ किंचिन्मध्योन्नतं कुर्यात्तु च्छ्रये द्वादशांगु- श्रीराम ॥१॥
लं। यदि कुंडात्पूर्वं तो गणेशांबिकापूजनं करोति तदा तत्सन्निधानत्वं नोपपद्यते। पुनश्च मद्रा

सनादाग्नेय्यां पैत्रकीं दिशि गणेशंन्नवति। आग्नेयी पित्रकार्ये प्रसिद्धा। दक्षिणां प्राचीं पित्र्ये इति गृह्यसू
त्रे। तस्मादाग्नेय्यां दिशि अर्थात् परिमाणमिति कात्यायनसूत्रन्यायेन षडंगुलपृथुत्वाद्दैंछूयणानिक्षादशांगु
ले स्थंडिले कुर्यात्। गणेशांबिकयोः स्थापनं। तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दंती प्रचोदयात्॥
इति मंत्रेण गणपतिस्थापनं॥ सुभगायै विद्महे काममालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्। अनेन गौरी
स्थापनं। ततः भद्रासनक्रिया॥ अथ कलशप्रकारः। मही द्यौरिति सप्तधान्योपरि कलशस्थापनं। न्न
र्जुवस्वीरिति पूरणं॥ यत्रौषधीरिति सर्वौषधिप्रक्षेपः। आयुष्यं वर्चस्यमिति हिरण्यं। अश्वत्थे व इति पं
च पल्लवानि। युवं वस्त्राणीति वासः। इदं ते पात्रमिति पूर्णपात्रं। याः फलिनीरिति नालिकेरं। एवं पू
र्वं कलशादि मंत्रावृत्त्या सर्वेषु कलशेषु। ततः प्रथमं भद्रासनात्पूर्वं स्थापयति। ततः सर्वेषु क
लशेषु प्रदक्षिणमुपचारं करोति। ततः ग्रहपीठस्येशानतः पंचमं कुंभं स्थापयति। ततः सर्वेषां
कलशानामन्वारभ्य जपति। कलाकला हि देवानां दानवानां कलाकला॥ विगृह्य निर्मितो येन
कलशस्तेन कथ्यते। कलशस्य मुखे ब्रह्मा ग्रीवायां तु महेश्वरः। मूले तु विंन्यसेद्विष्णुं मध्ये मातृग
णं तथा। कुक्षौ समुद्राश्चत्वारः सप्तद्वीपाश्च मेदिनी॥ अर्जुनी गोमती चैव चंद्रभागा सरस्वती॥

॥२॥ कावेरीकृष्णवर्णाचगंगाचैवमहानदी।तापीगोदावरीचैवमाहेंद्रीनर्मदातथा।नदाश्चविविधा
जातानद्यःसर्वास्तथापराः।प्रजासंपुष्करंचैवनैमिषंचहिमालयं।विश्वेश्वरंविमाथंचगंगा
सागरसंगमं।पृथिव्यांयानितीर्थानिकलशास्थानितानिवै।इतिद्वादशमंत्रैरधिवासनंका
र्यंततःकलशाधिष्ठात्रीदेवताभ्योनमइतिपूजनं।तेषुस्वस्त्ययनपूर्वंजपःकार्यःमंत्रायथा
ततअर्घं।कृत्वा।दधिदूर्वाशमीपत्रकुसुमाक्षतचंदनः।सिद्धार्थोदकपूर्णंतुकृतांजलिःदध्य
क्षतसुमनसोघृतसिद्धार्थंकायवाः।पानीयंचैवदर्भाश्चअष्टांगोर्घउच्यते।इतिअर्घंकृत्वा।गणे
शस्मरणं।स्वस्त्ययनं।प्रयोगः।अद्यश्रीब्रह्मणोद्वितीयपरार्द्धेश्रीश्वेतवाराहकल्पेवैवस्व
तमन्वंतरेअष्टाविंशतितमेकलियुगेप्रथमविभागेसंवर्त्यंचदशआषाढादिचतुःपंचा
शतमेवर्षेअमुकनाम्निसंवत्सरे।उत्तरायनगतेश्रीसूर्येअमुकऋतौ।अमुकमासे।अमुक
पक्षे।अमुकतिथौ।अमुकदिने।अमुकनक्षत्रे।अमुकयोगे।अमुककरणे।अमुकस्थेचंद्रे॥
अमुकस्थेसवितरि।अमुकस्थेदेवगुरौ।शेषेषुग्रहेषुयथास्थानस्थितेषुसत्सु।एवंगुणे ॥श्रीराम॥
विशिष्टपुण्येकाले।इहशेषफणामंडलाधारधरित्र्यां।जंबूद्वीपे।भारतवर्षेकुमारिकाक्षेत्रे॥ ॥२॥

आर्यावर्त्तांतर्गते ब्रह्मावर्त्तैकदेशे ॥ मंडपायतने गणेशादिदेवतानां ब्राह्मणानां च संन्निधौ ॥
एवं गुणविशिष्टायां पुण्यतिथौ ॥ शुभ तस्यामुककर्मप्रारंभनिमित्तं । सर्वारिष्टपरिहारार्थं सर्वकाम
समृध्यर्थं सर्वदुरितोपशांत्यर्थं विनायकोपसर्गनिवृत्त्यर्थं आदित्यादिनवग्रहाणां सानु
कूलार्थं शास्त्रोक्तफलावाप्त्यर्थं संग्रहयज्ञविनायकशांतिप्रारंभनिमिमितं स्वागतं आचा
र्यप्रमुखऋत्विगादीनां पादप्रक्षालनमहं करिष्ये । स्वागतं त्तो द्विजश्रेष्ठ मदनुग्रहकारकाः ॥ इ
दमर्घ्यमिदं पात्रं भवद्भिः प्रतिगृह्यतां । अर्घो ३ प्रतिगृह्यतां ऋग्वेदमूर्त्तये आचार्याय एत
त्ते पाद्यं ॥ पादप्रक्षालनं । एष वो अर्घः । पूजा । पूर्ववत्प्रकारेण स्वस्तिवाचक एतत्ते पाद्यं ।
ऋत्विक् एतत्ते पाद्यमिति सर्वत्र ॥ स्वयं पादप्रक्षालनादि । आचम्य प्राणायामान् कृत्वा
स्वस्त्ययनपाठः । गणेशस्मरणं । अपवित्रः पवित्रेत्यादिकालज्ञानं कृत्वा । वरणोपहारा
णां पवित्रतास्तु । नूराद्युपास्मे ० मधुश्च इत्यादि ० आचार्यप्रमुखऋत्विग्वरणमहं करिष्ये ।
वरणं । अक्षतान्गृहीत्वा अमुकसगोत्रः अमुकामुकशर्मन् । सर्वर्द्धिकामः संग्रहयज्ञविनायक

॥३॥ शांत्यास्थालीपाकयास्नपनपूर्विकया। धेन्वाद्युक्तदक्षिणया। अहं यक्ष्ये। तत्रमेत्वं आचार्योभव। यूयंस्व
स्तिवाचकाजापकाश्चभवत। अन्नादिपूजा। तांबूलादिको। यथादत्तगंधमाल्यार्चनंआचार्यप्रमुखऋत्विग्भ्यो
हं संप्रददे। योयस्यविभागःसप्रतिगृह्यतां॥ अर्चनविधेःपरिपूर्णता अस्तु। आचमनं। ॐ भूर्भुवःस्वः
अन्नेनमीमदंत॰हरी। यथादास्यमानंतृप्तिपर्यंतंभोजनंआचार्यप्रमुखऋत्विग्भ्योहंसंप्रददे। यो
यस्यवि॰। पुण्याहं दीर्घमायुरस्तु। शिवआपःसंतु॥ सौमनसमस्तु। अक्षतंचारिष्टंचास्तु। आत्म
न्शिरसि। शांखायनकारिकायोक्ताशिषःकार्याः॥ शांतिरस्तु॥ पुष्टिरस्तु। तुष्टिरस्तु। वृद्धिरस्तु। अवि
घ्नमस्तु। आयुष्यमस्तु। आरोग्यमस्तु। शिवंकर्मास्तु। कर्मसमृद्धिरस्तु। पुत्रसमृद्धिरस्तु। वेदसमृ
द्धिरस्तु। धनधान्यसमृद्धिरस्तु। इष्टसंपदस्तु। अरिष्टनिरसनमस्तु। यत्पापंरोगंदुरितमशुभं
तत्प्रतिहतमस्तु। द्विपदचतुष्पदेभ्यःस्तु शांतिर्भवतु॥ अस्यकृत्विग्वरणकर्मसंप्रतिष्ठासिध्यर्थं
श्रीगणेशांबिकयोःप्रीत्यर्थं॥ आदित्यादिनवग्रहाणांप्रीत्यर्थं आदित्यादिनवग्रहाणां सानुकूला
र्थं हिरण्यदक्षिणां निक्रये यथादास्यमानंद्रव्यं आचार्यप्रमुखऋत्विग्भ्यो हं संप्रददे। योयस्यवि ॥श्रीराम॥
गःसप्रतिगृह्यतां॥ ॐ दक्षिणाःपांतु। बहुदेयंचास्तु॥ दीर्घमायुःशांतिःपुष्टिश्चास्तु। यद्यच्छ्रेयःत ॥२॥

त्रदस्तु। तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्ना दिग्देवताः सुप्राः संपद्यतां। आदित्याद्याः ग्रहाः प्रीयंतां। प्र
जापतिः प्रीयतां। स्थावरसंयोगोऽस्तु। बहुपुत्रं बहुधनं चास्तु। उत्तरे कर्मण्यविघ्नमस्तु। अस्तिवाक्य
मिसहसर्वैः। पुण्याहकाले वाच्यतां। पुण्याहं भवंतो ब्रुवंतु। त्रिरावृत्तिः। वृद्धिं भवंतो ब्रुवंतु ३ कल्या
णं भवंतो ब्रुवंतु ३ स्वस्ति भवंतो ब्रुवंतु ३ अस्यर्त्विग्वरणकर्मणो यन्न्यूनातिरिक्तं तत्सर्वं ब्राह्म
णानां प्रसादात्॥ आदित्यादिनवग्रहाणां प्रसादात्। सर्वं परिपूर्णमस्तु। गृहे वृद्धिशतानि भवंतु। उ
त्तरे कर्मण्यविघ्नमस्तु। मांगल्यं माशीर्वादाश्चेति। अस्य यागस्य निष्पत्त्यै भवंतो भ्यर्थितामया। सु
प्रसादं प्रकर्त्तव्यं कर्म तद्विधिपूर्वकं॥ इति वरणं॥ आचम्य प्राणायामान् कृत्वा। मूलजाते वास्तु
होमे गणेशस्थापने तथा॥ प्रधानं पूर्वकर्त्तव्यं ग्रहयज्ञसमारम्भेत॥ अद्येत्यादि० विनायकशांतिक
र्मकर्माहं करिष्ये। स्वस्त्ययनपाठः। पंचभूसंस्कारः॥ चतुरस्रं गोमयेन स्थंडिलमुपलिप्य। उ
दकसंस्थं मध्ये लेखां लिखित्वा। तस्या उपरि प्राङ्मुखं लेखात्रयमुदकसंस्थं कृत्वोद्धृत्याद्भिर
भ्युक्ष्य ततः अग्निं प्रणयामि मनसा शिवेनायमस्तु संगमनो वसूनां मा नो हिंसीः स्थविरं मा (राम)
कुमारं शं नो भवद्विपदे शं चतुष्पदे इत्यनेन मंत्रेण एकारां तेनाग्निं प्रांचं प्रणयति। ततः

पाणिनासोदकेनत्रिः परिसमुह्य। ततः कुशैः पुरस्तादारभ्य प्रदक्षिणमैं त्रिपाठं कृत्वा। त
तः बर्हिः। ब्रह्मा। प्रणीता। पवित्रे। तच्छेदनानि। आज्यं। स्रुवः। स्रुक्क्रमेद्धाणं। संमार्गकुशा ॥
धमन्यं चरुः समिधः उपयमनकुशाः। दक्षिणा। पूर्णपात्रं च। आघारकं। प्रथमं कुंडात्पूर्वतः उत्तराग्रद
र्भस्तरणं मुक्त्वा। ततः द्वितीयं कुंडाद्दक्षिणतः पूर्वाग्रं तृतीयकुंडात्त्र्यं यं कुंडोत्पश्चिमतः उदगग्रं मु
क्त्वा। ततः चतुर्थं कुंडादुत्तरतः पूर्वाग्रं मुक्त्वा। ततः पंचमं ब्रह्मासनस्थाने पूर्वाग्रं मुक्त्वा। ततः षष्ठं प्र
णीतासनस्थाने पूर्वाग्रं मुक्त्वा। ततः सप्तमं आत्मासनस्थाने उत्तराग्रं मुक्त्वा। ततो ब्रह्मा उद
ककमंडलुं विष्टरं वा पुरस्तादग्नेर्नीत्वा ऋतुंव स्वरित्यनेन मंत्रेण दक्षासने स्थापयित्वा। पुष्पै र
र्चयति॥ ततः कोपः प्रणयतीत्यनेन मंत्रेण पः प्रणीयति। ऋतुंव स्वरित्यनेन मंत्रेण स्थापयेत्। ततः
परिस्तरणं। ततः कुशात्। तृतीयांशः दक्षिणहस्ते गृह्णाति। तस्य कुशात् सव्ये गृहीत्वा। ततः द्वितीयां
शः दक्षिणहस्ते गृह्णाति। तस्य कुशात् सव्ये गृहीत्वा। प्रथमस्य गृहीतस्य कुशात्तद्दक्षिणं जान्वाच्य। दक्षि
णेन हस्तेन पुरस्तादग्नेः स्तृणाति। पूर्वमुपचारं गृहीतस्य अथ पश्चाद्द्वितीयं स्तृणाति। ततः तृतीयस्य ॥श्रीराम॥
कुशास्थाने पवित्रं गृहीत्वा। अथ पश्चादथ पश्चात्स्तृणाति। सकृत्सकृत्स्तरणं कुर्यात्। मूलान्यग्रैः प्रच्छादय ॥४॥

ति। स्तरणानंतरं पवित्रं प्रादेशेन मापयित्वा। कुशमेतद्वाय पवित्रे स्थ इत्यनेन मंत्रेण छित्वा। प्रा
गग्रे कृत्वा। वैष्णव्यावित्यनेन मंत्रेणाद्भिरभ्युक्ष्य त्रीणि वा पवित्राणि कुर्यान्मंत्रस्तु स एव। ततः
पवित्राभ्यां प्रदक्षिणमग्निं त्रिः पर्युक्ष्य महीनां पयोसीत्यनेन मंत्रेणाज्यस्थालीमादाय। इषे त्वे
त्यनेन मंत्रेण अधिश्रयणं। एवं सर्षपतैलं स्रुवमधोबिलं प्रतप्य। संमार्गकुशैः संमृज्य। पुनः
प्रतप्य निदधाति। स्रुक् संमार्गः प्रतपनं। मेक्षणं च यथा स्रुचि। ऊर्जे त्वा इत्यनेन मंत्रेणोदु
दवासनं कृत्वा। आज्यानंतरेण सोदकं स्रुवं स्थाप्य। ततो दक्षिणहस्तेनोपकनिष्ठिकांगुष्ठाभ्यां
पवित्रे अग्रे गृहीत्वा। एवं वामहस्तेन मूले गृहीत्वा। ऊर्ध्वाग्रे मध्ये प्रह्वे कृत्वा ततः सवितु
ष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरित्यनेन मंत्रेणाज्यमुत्पुना
ति। ततः सवितुर्व रश्मिभिः सर्षपाणां तैलमपि संस्काराः सार्षपतैले क्रियंते। आज्य
वत्सदा। उदुंबरस्रुवं तां मंत्रवद्धोउदुंबर अथवा। आज्यानां सर्पिरादीनां संस्कारविधि श्रीरम
नोदिता। अनधिश्रयं दध्नः शेषाणां श्रयणं स्मृतं। अभिषेकं मूर्द्धि होमं मांगल्यं स्वस्ति १४
वाचने प्रैषमंत्रमुपस्थानेति ष्टं कुर्यात्सदेवाहि। ततः सवितुर्वे इति विकृतेनानेनैव मं

।।५।। त्रेण स्रुवस्थाश्चाप उत्पुनाति। ततः सव्यहस्तेन चरुस्थालीं गृहीत्वा पवित्रं तर्हि ते कृत्वा दक्षि
णहस्तेन तंदुलमुष्टिं चरुपात्रे निर्वपति। ॐ मिताय। संमिताय शालाय कटंकटाय कूष्मां
डाय राजपुत्राय जुष्टं गृह्णामि। त्रिर्मंत्रेण चतुर्थं तूष्णीं। शेषाणि मर्द्दनं। मिनाय॰ यमास
दयामि। ॐ सवित्रे सोमायांगारकाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतुभ्यो
जुष्टं गृह्णामि। पूर्ववत् चरुधर्मेण आसदनांतं कृत्वा॥ मिता॰ यत्वा जुष्टं प्रोक्षामि द्वितीये पूर्ववद्ध
र्मेण प्रोक्षणं। त्रिः प्रक्षालनं श्रपणं। गणेशांबिकानां पंचामृतेन स्नपनं। दुग्धमाप्यायस्वेति॥
दधि दधिक्राव्णो। घृतं घृतवती। मधु मधुवाता॥ शर्करा रसाय्येति प्रत्येकं स्नापयित्वा। ततः
अग्न्युत्तारणं कार्यं। ततः प्रतिष्ठा। ततः आवाहनं॥ गजवक्त्रो गणाध्यक्षः सर्वविघ्नविनाशनः॥
लंबोदर त्रिनेत्राय आगच्छ गणनायकः। हेमाद्रितनया देवी वरदा शंकरप्रिया। लंबोदरस्य जन
नीं। गौरीमावाहयाम्यहं। ततः संक्षेपपूजा। ततः ग्रहाणां स्थापनप्रकारः। वर्त्तुलं चतुरस्रं च त्रि ।।श्री।
कोणं बाणमेव च। दीर्घाकृति चतुःकोणं पंचकोणं धनुस्तथा। शूर्पं ध्वजश्चेत्याकारे मंडलानि यथा ।।५।।श्री
क्रमं। शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ॥ प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः॥ ६।

मध्येतु भास्करं विंद्याछशिनं पूर्वदक्षिणे। दक्षिणे लोहितं विंद्याद्बुधं पूर्वोत्तरेणतु। उत्तरेण गुरुं विं
द्यात्पूर्वेणैव तु भार्गवं। पश्चिमेन शनिं विंद्याद्राहुं दक्षिणपश्चिमे। पश्चिमोत्तरतः केतुः स्थाप्यावैशु
क्लतंदुलैः। ग्रहादेवाधिदेवाश्च दिक्पाला कोकैपालकाः। गणेशाद्यास्तथा पंचभानि देवास्तथा रग
नराः। आकृष्णेनेति मंत्रेण मध्ये सूर्यस्थापनं। आप्यायस्वेति मंत्रेण पूर्वदक्षिणे सोमस्थाप
नं। अग्निर्मूर्द्धेति मंत्रेण दक्षिणे मंगलस्थापनं। उद्बुध्यध्वमिति मंत्रेण पूर्वोत्तरेण बुधस्थाप
नं। बृहस्पते इति मंत्रेणोत्तरतः गुरुस्थापनं। शुक्रंते अन्यदिति मंत्रेण पूर्वे शुक्रस्थापनं। शा
मग्निरग्निभिरिति मंत्रेण पश्चिमेन शनिस्थापनं। कयानश्चित्र इति मंत्रेण दक्षिणपश्चिमे रा
हुः स्थापनं। केतुं कृण्वन्निति मंत्रेण पश्चिमोत्तरतः केतुस्थापनं अग्निंदूतमिति मंत्रेण सूर्याद्द
क्षिणमग्निस्थापनं। कद्रुद्रायेति मंत्रेण सूर्यादुत्तरतः रुद्रस्थापनं। अप्सुमे सोम इति मंत्रेण सो
मादुत्तरतो प्सुस्थापनं। गौरीर्मिमायेति मंत्रेण सोमाद्दक्षिणतः गौरीस्थापनं। स्योना पृथिवी
ति मंत्रेण भौमात्पश्चिमतो भूमिस्थापनं। यदक्रंद इति मंत्रेण भौमाद्दक्षिणतः स्कंदस्थाप ग्रीरमा
नं। इदं विष्णुरिति मंत्रेण बुधात्पूर्वभागे विष्णुस्थापनं। सहस्रशीर्षेति मंत्रेण बुधात्पश्चिम ५४।

॥६॥ तो नारायणस्थापनं॥ इंद्रः श्रेष्ठानीति मंत्रेण गुरोः पश्चिमतें द्रस्थापनं। ब्रह्मणस्पतेति मंत्रेण गु
रुपूर्वतो ब्रह्मास्थापनं॥ इंद्राणीमासुमंत्रेण शुक्रात्पश्चिमतमिंद्राणी स्थापनं। त्रातारमिंद्रमि
तिमंत्रेण शुक्रात्पूर्वतमिंद्रस्थापनं। प्रजापतेनत्वदितिमंत्रेण शनिशरात निर्ऋतिप्रजा
6 पतिं स्थापनं। परेयिवांसमितिमंत्रेण शनिशरात् आग्नेय्यां यमस्थापनं। आयं गौः पृश्निरितिमं
त्रेण राहुनिर्ऋतेसार्पराज्ञी स्थापनं॥ कायमानोवनात्वमितिमं तिमंत्रेण राहोरीशानात काल
स्थापनं। ब्रह्मजज्ञानमितिमंत्रेण केतोराग्नेय्यां ब्रह्मास्थापनं। चित्रं देवानामिति [illegible] तेति मंत्रेण केतोर्नि
र्ऋते चित्रगुप्तस्थापनं। त्रातारमिंद्रं त्वन्नो अग्ने तवायं [illegible]। प्रतायं युरुद्रुत्नमं वरुणा॥
नो नियुद्भिः। वयं सोमास्त्वमीशानमष्टाभिर्मंत्रैः प्राचीं दिशमारभ्य प्रदक्षिणमष्टादिक्षु पृथक्
पृथक् दिक्पालानां स्थापनं। अस्मेरुद्रेतिचा काशस्थापनं। स्योनापृथिवीति भूमिस्थापनं।
एंद्रसानसिं। ब्रह्मणस्पतेपरेयिवांसं वायवायाहि वरुणः प्राविताति पंचभिर्मंत्रैः बृहस्पति ॥श्री राम॥
गृहमध्ये सूर्यादुत्तरतः पश्चिमस्थादारभ्य पूर्वसंस्थं लोकपालानां स्थापनं। गणानांत्वाजात ॥६॥
वेदसे क्षेत्रस्य पतिना वास्तोष्पते प्रतिमरुतो यस्य हि क्षय इति पंचभिर्मंत्रैः बृहस्पतिगृहमध्ये

लोकपालादुत्तरतः गुरोर्द्दक्षिणतः पश्चिमस्थादारभ्यपूर्वसंस्थंलोकपालात्समंगणेशा
नोंचस्थापनंपूर्वेअग्निर्ऋषिः प्रजापतआप्यायस्वकद्रुद्रायादितिर्द्यौर्बृहस्पतेअतियदर्यः
कालिकोनामेतिसप्तभिर्मंत्रैउदकसंस्थादारभ्यदक्षिणसंस्थंसमंसप्तन्निर्रुद्राणिस्था
पयित्वादक्षिणेउदीरतामवरेन्द्रोनोअग्निर्ऋजुनीतीनःसवितापश्चातादिहत्व
ष्टारंवायवायाहीन्द्राग्नीआगतमितिसप्तभिर्मंत्रैः पूर्वसंस्थादारभ्यपश्चिमसंस्थंसमं
सप्तन्निर्रुद्राणिस्थापयित्वा॥ पश्चिमेआनोमित्रावरुणाज्ञातारमिंद्रप्रतार्यायुःसमु
द्रज्येष्ठाउमासम्भ्रषणीघृतंस्तत्सवितुर्वरेण्यमिदंविष्णुरितिसप्तन्निर्मंत्रैः दक्षिणसं
स्थंसप्तन्निर्रुद्राणिस्थापयित्वाउत्तरेयेनःसपत्नावरुणः प्राविताशन्नोअजएकपादु
तनोहिर्बुध्न्यपूषागाअन्वेतुनएषोउषाःपरेयिवांसमितिसप्तन्निर्मंत्रैः पश्चिमसं
स्थादारभ्यपूर्वसंस्थंसमंसप्तन्निर्रुद्राणिस्थापयित्वाब्रह्मणस्पतेत्वमिदंविष्णु
कद्रुद्रायेतितिस्रोमंत्राः रुद्रकलशस्यापरिब्रह्मविष्णुरुद्रान्स्थापयित्वा।सर्वेषांदे

॥१७॥ वानां प्रणवसहितं पृथक्स्थापनं। ततस्तदस्तु मित्रावरुणेति मंत्रेण प्रतिष्ठा। आदित्यादि
नवग्रहाः स्थापिते देवतासहिताः सुप्रतिष्ठिता वरदा भवंतु। ततः सर्वेषां ग्रहाणामावाहनं।
मध्यमे मंडले रक्ते प्राङ्मुखं वर्तुलं भुक्ते। कलिंगदेशसंभूतं काश्यपं पद्मधारिणं। सप्ताश्वद्वि
भुजं देवं सूर्यमावाहयाम्यहं॥ आग्नेये मंडले चतुःकोणे प्रत्यङ्मुखं सिते। यमुनादेशसंभू
तमत्रिगोत्रं गदाधरं। दशाश्वं द्विभुजं देवं सोममावाहयाम्यहं। दक्षिणे मंडले रक्ते त्रिको
णे दक्षिणामुखं। आवंत्यं मेषमारूढं भारद्वाजं चतुर्भुजं। शक्तिशूलगदापाणिं भौममा
वाहयाम्यहं। ईशाने मंडले पीते बाणाकारमुदङ्मुखं। मागधं सिंहमारूढमत्रिगोत्रं चतुर्भुजं॥
गदाखेटधनुर्बाहुं बुधमावाहयाम्यहं। उत्तरे पीतकं दीर्घं चतुरस्रमुदङ्मुखं॥ सैंधवं चहया
रूढं मंगराजं चतुर्भुजं। पुस्तकं दंडाक्षौ दधुक्तं गुरुमावाहयाम्यहं। पूर्वस्मिन्मंडले पंचकोणे पूर्वा
मुखं सितं। मौंजकङ्कं हयारूढं चतुर्बाहुं च भार्गवं। कमंडल्वक्षसूत्राभ्यां शुक्रमावाहयाम्यहं। पश्चिमे
मंडले कृष्णे धनुष्के दक्षिणामुखं॥ सौराष्ट्रं काश्यपं क्रौरं गृध्रारूढं चतुर्भुजं। शूलबाणधनुर्बाहुं शनि ॥श्री राम॥
मावाहयाम्यहं॥ नैर्ऋते मंडले सूर्पेकृष्णे दक्षिणतोमुखं। बर्बरं पैठिनसं च सिंहारूढं चतुर्भुजं। ख ॥१७॥

ङ्गशूलचर्मधरं राहुमावाहयाम्यहं। वायव्ये मंडले कृष्णे ध्वजाभेयमदिङ्मुखान्। अंतर्वेदिसमुद्भूता
न्के पोतासृन्न जैमिनीन्। द्विभुजानादिनो धूम्रान्केतूनावाहयाम्यहं। इति नवग्रहाणामावाहनं का
र्यं। गजवक्त्रो गणाध्यक्षः सर्वविघ्नविनाशनः। लंबोदरस्त्रिनेत्राय आगच्छ गणनायक। हेमाद्रित
नयां देवीं वरदां शंकरप्रियां। लंबोदरस्य जननीं गौरीमावाहयाम्यहं। अनया गंधमदिकया यथाव
र्णानि वासांसि नववर्त्तिकं दीपं चंपकादि पुष्पं गुडौदनादि नैवेद्यं द्राक्षादि फलानि। आदित्यादि
नवग्रहेभ्यः स्थापितदेवतासहितेभ्यः प्रीयतां। अत्रादि लघुपूजा। श्रुताग्निधारणं। श्रुतानां तु पू
र्वेणोद्वासितानां वु पृष्ठतः। उदगविच्छिन्नं पश्चादग्नेर्निधानं। पार्श्वप्रक्षालनं प्रत्यग्निधारणं च। त
तः सप्त दश समिधस्त्याधय। विष्णोर्हस्तोसीत्यनेन मंत्रेण सव्येन कुशान् दक्षिणेन मूले स्रुवं
युगपद्गृहीत्वा दक्षिणं जान्वाच्य जानुत्या मंतरेण दक्षिणं बाहुं कृत्वा आघोरसंज्ञके द्वे हुत्वा। आ
जुहोति। त्वमग्ने प्रमतिरित्यनेन मंत्रेणोत्तरतः पश्चार्द्धादग्नेरारभ्याविच्छिन्नं दक्षिणतो हुत्वा। इमम्
यस्येमे हिमवंतो इत्यादिना मंत्रेण दक्षिण पश्चार्द्धादग्नेरारभ्याविच्छिन्नमुत्तरतो हुत्वा। ततः
ग्नये स्वाहेत्युत्तरमाज्यभागं। सोमाय स्वाहेति दक्षिणं। ततो मां गल्यं। वाससोः प्रदानं। परिधाय

।।क्ष।।
।।१८।।

चम्य गुरुदेवतां नमस्कृत्य तद्भद्रासनं प्रदक्षिणीकृत्य पुण्याहशब्देनोपविशति। कल्केनाचार्यः
पादादि अन्त्यंजनै। तथा नारीचतुष्टयमन्त्यंजनै। तथा सौवासिनीनां स्रजमुकुटकुसुमतांबूल
वस्त्रादिदानं। उद्वर्त्तनं चंदनागुरुकर्पूरकस्तूरीकुंकुमानि च। सुगंधद्रव्यमित्येनेनाम्नातयक्षक
र्द्दमं। इति यक्षकर्द्दमेन शिरो विलिप्य ततः मांगल्यं ततः चतुर्णां स्त्रीणां वर्द्धापनं। ततः स्वस्तिवा
चकानां ब्राह्मणानां हस्ते पुण्याहं दीर्घमायुरस्त्वित्यादि। आत्मनः शिरसि पूर्ववत् कारिकयो
क्ताशीः कार्या। ततः सुतस्यामुककर्म प्रारंभनिमित्तं भद्रासनोपविष्टस्य स्नपनकर्मणि
श्रीगणेशांबिकयोः प्रीत्यर्थं तथा आदित्यादिनवग्रहाणां प्रीत्यर्थं हिरण्यदक्षिणां निष्क्रयेय
थादास्यमानेहत्यं स्वस्तिवाचकब्राह्मणेभ्योऽहं संप्रददे। यो यस्य विघ्न ग इति। पूर्वोक्तं कृत्वा भ
गवती श्रीअंबिका प्रीत्यर्थं चत्वारि कार्पासयोक्ताणि विचित्राणि वासांसि स्रजमुकुटकुंकुमतां
बूलसहितानि च तस्य स्यः। सौवासिनीभ्योऽहं संप्रददे। तेन भगवती श्रीअंबिका प्रीयतां। अ ।। श्री रेरमा
स्य कर्मणो गृहे वृद्धिं शतानि भवंतु। आशीर्वादाः। स्नपनं। अभिषेकः। सहस्राक्षेण शतधारमृ ६।।
षीभिः पावनं कृतं। तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते। इति मंत्रेण गुरुः भद्रासनात्पूर्वंकुं

नं वामहस्ते गृहीत्वा यजमानस्य पश्चात् पूर्वाभिमुखस्तिष्ठन् पंच पल्लव सहितं दक्षिण
हस्तेनाभिषिंचेत्। आगंते वरुणो राजा आगं सूर्यो बृहस्पतिः। आगमिंद्रश्च वायुश्च आगं सप्त
र्षयो ददुः। इति मंत्रासनात् दक्षिणकुंभं पूर्ववद्धर्मेणाभिषिंचेत्। यत्ते केशेषु दौर्भाग्यं सीमं
ते यच्च मूर्द्धनि। ललाटे कर्णयोरक्ष्योरापस्तद्घ्नंतु ते सदा। इति मंत्रासनात् पश्चिमकुंभं
पूर्ववद्धर्मेणाभिषिंचेत्। ततः सहस्राक्षं मंत्रत्रयावृत्त्या मंत्रासनादुत्तरकुंभं पूर्ववद्ध
र्मेण स्नपनं कर्त्तव्यं। ततः यजमाने मस्तके कुशमुष्टिं सव्यहस्ते गृहीत्वा दक्षिणहस्तेन
उदुंबरस्रुवेण मितायेति षट् सर्षपतिलाहुतीः मस्तके तिष्ठन् यजमानस्तदा त्यागं क
रोति। यजमाने छयास्नानं। मितायेत्यादि षट् चतुर्गृहीतेन चर्वाहुतीर्हुत्वा। ततः अर्कः
पलाशः खदिरस्त्वपामार्गोथ पिप्पलः। उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्। ततः
समिदाज्य चरूणां च होमः तिलयवैः क्रमात्। द्राक्षेक्षु पूगनारिंग जंबीर बीजपूरकं। उत्त
तीनालिकेरं च दाडिंबानि फलानि च। इति फलहोमः। ततः स्थापित देवतानां स्थापित मंत्रे
ण होमः। ततो रुद्रजाप्य दशांश होमः। अश्याम त इति मंत्रेण १ आहुति १२ पर्वप्रमाणमाहुत्या

पंचांगुलिगृहीतया। दध्याज्य क्षीरसंयुक्तांत्सयवांजुहुया तिलान्। उत्तानेन च हस्तेन अंगुष्ठाग्रेप्रपी
डितान्। संहितांगुलिपाणिस्तु वाग्यतोजुहुयाद्धविः। दानं प्रतिग्रहो होमो भोजनं बलिरेव च। सां
गुष्ठेन सदा कार्यमसुरेभ्योन्यथा भवेत्। ततोवेदादयस्त्र्यंबकश्चलक्ष्मीश्चाथसरस्वती। मरुत्प
र्जन्य वसवो विश्वेदेवाश्विनीसुतौ॥ गायत्री महाव्याहृतीश्चेत्यस्थापितहोमः। अग्निमीला इ
षेत्वा। अग्न आयाहि। शन्नोदेवीरिति वेदादिः। त्र्यंबकं 'सक्तुमिव 'पावकानः 'मरुतो। मारुतस्य
नः 'पर्जन्यायप्रगायत 'येनः सपत्ना 'विश्वेदेवास 'एषोउषा 'स्तत्सवितुर्वरेण्यं 'भूर्भुवः स्वश्चे
त्यस्थापितहोमः। पश्चादग्नेतर्येस्त्रेजमानेस्त्यागसमाचरेत्। मंत्रोक्तदेवतानाम चतुर्थी
तमिदं न मम। ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः। एवं विध आगत्य पूजयेत्। तत
तो यजमानेन श्रीगणेशाम्बिकयोः पूजनं। अद्येत्यादि पूर्वोक्त गुणविशिष्टायां पुण्यतिथौ
श्रीगणेशस्य षोडशोपचारैः पूजनमहं करिष्ये। तत्पुरुषायेति मंत्रेण षोडशोपचा
र पूजनं। प्रथमं देहे ओं तन्न्यासं कृत्वा वामदक्षिणयोः पाण्योः पादौ जान्वोः कटिद्वये नाभौ ॥श्री ग॥
नाभौ हृदि गले बाह्वोर्मुखे चक्षुः शिरसि एवं देहन्यासं कृत्वा पश्चाद्गणपतेर्न्यासं करोति॥ ॥९॥

आवाहनं।आसनं।पाद्यं।अर्घ्यं।आचमनं।स्नानमाचमनं।वस्त्रमाचमनं।उपवीतमाचमनं।वि
लेपनं।पुष्पं धूपं दीपं॥ नैवेद्यं इदं वैणवमूपक्कताक्तताद्युपहारजातं नैवेद्यं भगवान्श्रीम
हागणपतिः प्रीयतां।आचमनं।आरात्रिकं।मंत्रेण नमस्कारः।रूपं देहि जयं देहि भगं भग
वन्देहि मे।पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे।श्रीगणेशायायमर्घ्यः तत्तुरुषाय॰
यात एष ते दूर्वासर्षपपुष्पांजलिः।ततः प्रदक्षिणा।ततः पुण्याहं दीर्घमित्यादि।अस्यकृ
तषोडशोपचारपूजनकर्मणः समृद्ध्यर्थं यथादास्यमानानि त्वग्निपर्यंतानि ब्राह्मणभो
जनानि यथासंख्याकान्ब्राह्मणानहं तर्पयिष्ये।भगवान्श्रीमहागणपतिः प्रीयतां।अ
स्यकृतषोडशोपचारकर्मणः प्रतिष्ठासिद्ध्यर्थं श्रीमहागणपतिप्रीत्यर्थं हिरण्यदक्षिणानि
ष्क्रयेय यथादास्यमानं द्रव्यं नानागोत्रेभ्यो ब्राह्मणेभ्यो हं संप्रददे।भगवान श्रीमहागणपतिः
प्रीयतां।पूजासंकल्पः।अनेन कृतषोडशोपचारपूजनेन श्रीमहागणपतिः प्रीयतां।रूपं
देहीति मंत्रेण उत्थापनं।अस्य पूजन॰परिपूर्णमस्तु।पूर्वोक्तगुण॰भगवत्याः श्रीअंबिकायाः पूजन
महं करिष्ये।पूर्वोक्तपूजाकार्या।ततः ग्रहाणां च पूजनं।आचम्य प्राणायामान्कृत्वा।अद्येत्यादि॰तिथौ

॥१०॥ आदित्यादिनवग्रहेभ्यः स्थापितदेवतासहितेभ्यः पूजनमर्चनमहं करिष्ये। यजमानः सपत्नीकोऽथ
ह पूजां समारभेत्। गंधमादिभिर्यथावर्णैर्नाममंत्रैस्तु नमोन्वितैः। यथावर्णं प्रदातव्यं वासः पुष्पं विले
पनं नव वर्त्तियुतं दीपं घृतेन परिपूरितं। इदमत्र। चंदनं। कुंकुमारक्तारव्यं करवीरं च तं छेतं कुसुंभ
कं। पंचकं शतपत्रं च जाती पुष्पं शमी तथा। पुष्पं चागस्त्यकं प्रोक्तं विचित्राणि यथाक्रमं। इति पुष्पं॥
धूपदीपौ तं कृत्वा। ततद्राक्षैस्तु पूगनारिंगं जंबीरं बीजपूरकं। उत्तत्ती नालिकेरं च दाडिमानि फला
नि च। दद्यादन्यद्यथालाभं पूगं पत्रादिकं ततः। इति फलपूजनं। ततः अर्घं कृत्वा। पत्रं पुष्पं फलं तो
यं रत्नानि विविधानि च॥ गृहाणार्घं मया दत्तं देहि मे वांछितं फलं। आदित्याद्याग्रहाः सर्वे पीठे
ऽत्र प्रतिष्ठिताः। ते गृह्णंतु मया दत्तमिममर्घ्यं नमो नमः। आदित्यादिनवग्रहेभ्यः स्थापितदे
वतासहितेभ्यः अयमर्घः। गुडोदनं पायसं च हविष्यं क्षीरषाष्टिकं। दध्योदनं हविश्चूर्णं संमारखं
चित्रान्नमेव च। इति नैवेद्यं। आरात्रिका। ब्राह्मणभोजनं। दक्षिणासंकल्पः। नमस्कारः। ततः प्रार्थ श्रीराम॥
ना। आयुर्विद्यां धनं दत्त यशः सौख्यं च पुष्कलं। पुत्रान् दत्त सुखं दत्त सर्वान्कामांश्च दत्त मे। ततः श्रजा ॥१०॥
संकल्पः। अनयाः कृतपूजायाः आदित्यादिनवग्रहेभ्यः स्थापितदेवतासहितेभ्यः प्रीयतां। अ

स्यकर्मणोयं॰ त्सर्वंपरिपूर्णमस्तु। आचार्येण वह्निपूजा कार्या। कपिलः पिंगलो धूम्रः केतुर्जाठर एव च।
शिखी च हाटकश्चैव महातेजा हुताशनो। चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च। हूयते च पुनर्द्वा
भ्यां तस्मै यज्ञात्मने नमः। ततः खेचर पूजा बलिदानं। त्रातारमिंद्र॰ त्विंद्रः। इंद्राय नमः। इंद्रानुचरेभ्यो
नमः। एष माष बलिं समर्पयामि। भो इंद्र बलिं गृह्ण दिशां रक्ष मां रक्ष मम सपरिवारस्य आयुःकर्त्ता शांति
कर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता वरदा भव। सत्र बलिदाने देवतानामेजहः।। त्वन्नोअग्नेत॰ व्रतोअग्नये
नमः। अग्न्यनुचरेभ्यो नमः। यस्मिन्वृक्षे॰ नति। यमाय नमः। यमानुचरेभ्यो नमः। प्रतार्यायुः॰
हीतं।। निर्ऋतये नमः।। निर्ऋत्यनुचरेभ्यो नमः। उदुत्तमं॰ स्याम। वरुणाय नमः। वरुणानुचरेभ्यो
नमः। आनोमियुत्॰ दानः। वायवे नमः। वाय्वनुचरेभ्यो नमः। वयं सोम व्रते॰ महि। सोमाय
नमः। सोमानुचरेभ्यो नमः। तमीशानं॰ स्वस्तये। ईशानाय नमः। ईशानानुचरेभ्यो नमः। अ
स्मे रुद्रा॰ देवाः। ब्रह्मणे नमः। ब्रह्मण्यनुचरेभ्यो नमः। स्योना पृथिवि॰ प्रथः। पृथिव्यै नमः।
पृथिव्यनुचरेभ्यो नमः। त्रातारमिंद्रमित्यादि दशभिर्मंत्रैः प्रदक्षिणं पूर्वोक्तस्थापितधर्मेण
होमकुंडस्य परितः प्रदक्षिणं संस्थं बलिदानं कर्त्तव्यं। ततः समुद्रादूर्मिर्मधुमानिति मंत्रेण प

॥११॥ कादशऋचस्य सूक्तस्येति पूर्णाहुतिः कर्तव्यः। ततः चतुर्गृहीतेन अग्नये स्विष्टकृते स्वाहेति स्वि
ष्टकृतं हुत्वा। ततो महाव्याहृतयश्चतस्रः। ततो भूर्भुवः स्वः स्वाहा॥ ततः अयाश्चाग्नेस्यनभिश
स्तिश्च सत्यमित्वमया असि। अया सा मनसा कृतो यासं हव्यमूहिषे अया नः कृणुहि भेषजं स्वाहा॥
इति सर्वप्रायश्चित्तासंज्ञके हुत्वा आहुती जुहोति। ततः प्रजापतये स्वाहेति। ततः सव्ये पाणौ येकु
शाः स्तान्दक्षिणेनाग्रे संगृह्य मूले सव्येनेति गृहीत्वा। स्रुच्यग्रं मध्ये स्रुवे मूलमाज्यरूढान्यां तत
स्तानग्नौ वासोसीत्यनेन मंत्रेणाग्नौ प्रक्षिपेत्। ततस्तिस्रः समिधस्त्याधाय पूर्ववत्पर्युक्षणं त
तः इदमापः प्रवहतेति तत्त्वेन मार्जनं। कृत्वा पवित्रे तं अग्नौ प्रक्षिपेत्। ततो बर्हिर्होमः। पुण्याहे
दीर्घमायुरस्त्वित्यादि। अस्मिन्स गृह विनायकयज्ञकर्मणि यद्यद्द्रव्यं यावद्यावत्संख्याकं येन
येन मंत्रेण हुतं तत्तद्द्रव्यं तावत्तावत्संख्याकं तत्तस्यै देवतायै सा सा देवता प्रीयतां। ब्राह्मणभोज
नसंकल्पः धेन्वाद्युत्कृदक्षिणासंकल्पः। वस्त्रयुग्मं गुरवे। भूयसीं दक्षिणाः पांत्वित्यादि स्व
स्त्ययनं ततोऽभिषेकः। मांगल्यमाशीर्वादाश्चेति। विनायकश्चरुशेषेणात्रातारमिंद्रमिति म ॥श्रीराम॥
द्रासनस्य परितो बलिदानं पूर्ववत्। ततश्चत्वरे गत्वा पूर्ववत्प्रयोगं कृत्वा चत्वाराधिष्ठात्रीदेव ॥११॥

लोकपा
ला ४

तानांपूजनमहंकरिष्ये।अत्रादिपूजाशूर्पंगृहीत्वामंत्राननुच्चरेत्।बलिंगृह्णन्त्विमंदेवाआ
दित्यावसवस्तथा।मरुतोथाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः।असुरायातुधानाश्चपि
शाचामातरोरगाः।शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः।जृंभकाःसिद्धगंधर्वा
मालाविद्याधरानराः।दिक्पालाश्चयेचविघ्नविनायकाः।जगतांशांतिकर्तारोब्रह्माद्या
श्चमहर्षयः।माविघ्नोमाचमेपापंमासंतुपरिपंथिनः।सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखा
वहाः।पूर्वकोणेशूर्पंमुक्त्वा।इदंवै[illegible]नवंशूर्पंकृताकृताद्युपहारजातंनैवेद्यंभगवतीश्रीचक्र
राधिष्ठात्रीदेवताःप्रीयताम्।प्रदक्षिणमतिक्रम्यगृहेगत्वा।ततःप्रणीताविमोकः।ततः
पूर्णपात्रसंकल्पः।अस्यकर्मणःसमृध्यर्थंकर्मांगदेवतानांप्रीत्यर्थंयथादास्यमानपू
र्णपात्रंब्रह्मन्स्तुभ्यमहंसंप्रददे।ततःब्राह्मणभोजनसंकल्पः।अस्यकर्मणःसमृध्य
र्थंकर्मांगदेवतानांप्रीत्यर्थंयथासंपन्नेनान्नेनतृप्तिपर्यंतेनभोजनेनब्राह्मणमेकंअहं
तर्पयिष्ये।भगवत्यःकर्मांगदेवताःप्रीयताम्।शन्नइंद्राग्नीइति।त्रयोवैयज्ञेकामाइति।अ
स्यकर्मणोयन्न्यूनातिरिक्तंतत्सर्वंब्राह्मणानांप्रसादात्श्रीगणेशांबिकयोःप्रसादात्आदि

विनायकशांतिप्रयोगः॥
॥१२॥

त्यादिनवग्रहाणां प्रसादात् सर्वं परिपूर्णमस्तु। गृहे वृद्धिशतानि भवंतु उत्तरे कर्मण्य विघ्न
मस्तु। मांगल्यं आशिर्वादाश्चाति। गच्छ गच्छ सुरश्रेष्ठ स्वस्थान परमेश्वर॥ इष्टिकामसमृध्य
र्थं पुनरागमनाय च॥ अग्निप्रार्थनापुष्पं निक्षिपेत्॥ यांतु देवगणाः सर्वे पूजामादायहेस्त्न
श्रः। सिद्धिं च विपुलं दत्वा पुनरागमनाय च॥ तेनैवाग्नौ वैश्वदेवः॥ ॥इति विनायकशां
तिः समाप्ता॥ ॥छ॥ श्रीरस्तु॥ संवत् १७६० वर्षे मार्गशीर्ष शुद्ध १० सोमवार॥ श्रीरामश्रीकृष्ण

ज्वपमपदार्थानुक्रमः॥ संकल्पं विघ्नराजस्य गौर्याश्च स्थापनं ततः॥ व
रणं ब्राह्मणानां च ततो भद्रासनक्रिया। स्थापनं च कलशानां च तेषु मुद्रापनानि
कां कुशांडीचरुपाकांता तत्पूजा द्वयोरपि॥२॥ प्रता जि वारणा धाज्यभागां
ता ब्रूकुशंडीका भद्रासनोपानिषस्मक के नो द्वर्त्तनं ततः २ गंधैर्मृद्भिर्नितेपैश्च ॥श्रीराम॥
दाक्षिणस्वस्तिवाचनं कलशैः स्नपनं तस्य तैलहोमस्य मस्तके यजमाने धया ॥१२॥
स्नानं च रोराहुतयो प्रूषट ।विनायकांबिका पूजा पूर्णमोऽर्घ स्तथांजुलीनसकुच
चैव पूजापात्रस्थानं पथक पक्व कुशादि स्विष्टत तत पूर्णपात्र ब्रह्मा निस तरे कर्प
र्भनात् ६ होममन्त्र दक्षिणादीनां कल्पना मगतक्रेयावलि दानं चरोशेषा मोचनं